६ कार्त्तिकेये पु० तस्य तद्बीजजातत्वात् तथात्वम् अग्निकुमारशब्दे विवृतिः। ७ रुधिरे न० जठरानलजायमानत्वात् देहस्थपित्तरूपाग्नेर्विकारत्वात् वाऽस्य तथात्वम्। अग्नये हितम् ढक्। जठरानलादिवृद्धिकरे वैद्यकोक्ते ८ द्रव्यभेदे त्रि० ९ बाह्याग्निवर्द्धके जतुप्रभृतौ च १० अग्निपर्व्वते ११देशभेदे च पु०तस्य देशस्याग्न्यधिष्ठितत्वात् तथात्वम् स च देशः। दक्षिणापथवर्त्तिकूर्म्मकिष्किन्ध्यादेशसमीपस्थः माहिष्मतीपुरीयुक्तः तत्र हि वह्निः नीलराजकन्यासौन्दर्य्येण मोहितःताञ्चकमेऽथ ताञ्चोढ्वा तत्साहाय्यार्थं तत्रैव पुर्य्यां स्वयं स्थितः यथोक्तम्” भा० स०प०“तत्र माहिष्मतीवासी भगवान् हव्यवाहनः। श्रूयते हि गृहीतो वै पुरस्तात् पारदारिकः। नीलस्य राज्ञो दुहिता बभूवातीव शोभना। साग्निहोत्रमुपातिष्ठद्बोधनाय पितुः सदा। व्यजनैर्धूयमानोऽपि तावत् प्रज्वलते न सः। यावच्चारुपुटौष्ठेन वायुना न विधूयते। ततः स भगवानग्निश्चकमे तां सुदर्शनाम्। नीलस्य राज्ञः सर्व्वेषामुपनीतश्च सोऽभवत्। ततो ब्राह्मणरूपेण रममाणो यदृच्छया। चकमे तां वरारोहां कन्यामुत्पललोचनाम् तन्तु राजा यथाशास्त्रमशिषद्धार्म्मिकस्तदा। प्रजज्वाल ततः कोपाद्भगवान् हव्यवाहनः। तं दृष्ट्वा विस्मितो राजा जगाम शिरसावनिम्। ततः कालेन तां कन्यां तथैव हि तदा नृपः। प्रददौ विप्ररूपाय वह्नये शिरसा नतः। प्रतिगृह्य च तां सुभ्रूं नीलराज्ञः सुतां तदा। चक्रे प्रसादं भगवांस्तस्य राज्ञो विभावसुः। वरेण च्छन्दयामास तं नृपं स्विष्टकृत्तमः। अभयञ्च स जग्राह स्वसैन्ये वै महीपतिः। ततः प्रभृति ये केचिदज्ञानात्तां पुरीं नृपाः। जिगीषन्ति बलाद्राजंस्ते दह्यन्ते स्म वह्निना। तस्यां पुर्य्यां तदा चैव माहिष्मत्यां कुरूद्वह !। बभूवुरनतिग्राह्या योषितश्छन्दतः किल। एवमग्निर्व्वरं प्रादात् स्त्रीणामप्रतिवारणे। स्वैरिण्यस्तत्र नार्य्यो हि यथेष्टं विचरन्त्युत। वर्ज्जयन्ति च राजानस्तत्पुरं भरतर्षभ। भयादग्नेर्म्महाराज! ततः प्रभृति सर्व्वदा। सहदेवस्तु धर्म्मात्मा सैन्यं दृष्ट्वा भयार्द्दितम्। परीतमग्निना राजन्नाकम्पत यथाऽचलः। उपस्पृश्य शुचिर्भूत्वा सोऽब्रवीत् पावकं ततः। सहदेव उवाच। त्वदर्थोऽयं समारम्भः कृष्णवर्त्म नमोऽस्तु ते। मुखं त्वमसि देवानां यज्ञस्त्वमसि पावक !। पावनात् पावकश्चासि वहनाद्धव्यवाहनः। वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि। चित्रभानुः सुरेशश्च अनलस्त्वं विभावसो !। स्वर्गद्वारस्पृशश्चासि हुताशो ज्वलनः शिखी। वैश्वानरस्त्वं पिङ्गेशः प्लवङ्गो भूरितेजसः। कुमारसूस्त्वं भगवान् रुद्रगर्भो हिरण्यकृत्। अग्निर्द्ददातु मे तेजो वायुः प्राणं ददातु मे। पृथिवी बलमादध्याच्छिवञ्चापो दिशन्तु मे। अपां गर्भ! महासत्त्व! जातवेदः! सुरेश्वर!। देवानां मुखमग्ने! त्वं सत्येन विपुनीहि माम्। ऋषिभिर्ब्राह्मणैश्चैव दैवतैरसुरैरपि। नित्यं सुहुतयज्ञेषु सत्येन विपुनीहि माम्। धूमकेतुः शिखी च त्वं पापहानिलसम्भवः। सर्वप्राणिषु नित्यस्थः सत्येन विपुनीहि माम्। एवं स्तुतोऽसि भगवन् प्रीतेन शुचिना मया। तुष्टिं पुष्टिं श्रुतिञ्चैव प्रीतिञ्चाग्ने! प्रयच्छ मे। वैशम्पायन उवाच। इत्येवं मन्त्रमाग्नेयं पठन् यो जुहुयाद्विभुम्। ऋद्धिमान् सततं दान्तः सर्वपापैः प्रमुच्यते। सहदेव उवाच। यज्ञविघ्नमिमं कर्त्तुं नार्हस्त्वं हव्यवाहन!। एवमुक्त्वा तु माद्रेयः कुशैरास्तीर्य्य मेदिनीम्। विधिवत् पुरुषव्याघ्रः पावकं प्रत्युपाविशत्। प्रमुखे तस्य सैन्यस्य भियोद्विग्नस्य भारत। न चैनमत्यगाद्वह्निर्वेलामिव महोदधिः। तमुपेत्य शनैर्वह्निरुवाच कुरुनन्दनम्। सहदेवं नृणां देवं सान्त्वपूर्वमिदं वचः। उत्तिष्ठोत्तिष्ठ कौरव्य! जिज्ञासेयं मया कृता। वेद्मि सर्वमभिप्रायं तव धर्म्मसुतस्य च। मया तु रक्षितव्येयं पुरी भरतसत्तम। यावद्राज्ञो हि नीलस्य कुले वंशधरा नृपाः” १२ अग्न्युपासने मन्त्रे १३अग्निसम्बन्धिधारणाभेदे स्त्री“आग्नेय्या धारणया देहं दग्ध्वेति भूतशुद्धिः। “देहं धारणयाग्नेय्या दग्ध्वा धामाविशत् स्वकम्”भाग० १४दक्षिणपूर्व्वायां दिशि स्त्री। अग्नेर्भक्तः ढक्। १५ अग्निभक्ते आग्नेयो वै ब्राह्मणो देवतया” श्रुतिः अग्नेरपत्यम् अग्नेरागतम् अग्नौ भवः अग्निना दृष्टं सामेति वा ढक्। १६ अग्नेरपत्ये १७अग्नितआगते १८ त्रि० अग्निना दृष्टे सामनि न० “मन्त्रं भौमं तथा तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसञ्चैव सप्त स्नानानि चक्षते” इति विभज्य “आग्नेयं भस्मना स्नानमिति” पराशरोक्ते भस्ममर्द्दनपूर्वके १९ स्नाने न०। “प्रतापयुक्तस्तेजस्वी नित्यं स्यात् पापकर्मसु दुष्टसामन्तहिंस्रश्च तदाग्नेयं व्रतं स्मृतमिति”मनूक्ते २०नृपतिचरितभेदे न०अग्नौ अग्न्युद्दीपने साधु ढक्। २१अग्न्युद्दीपनसाधने जतुघृतादौ त्रि० “जिघ्राणोऽस्य वसागन्धं सर्पिर्जतुविमिश्रितम्। कृतं हि व्यक्तमाग्नेयमिदं वेश्म परन्तप!” “यदीदं गृहमाग्नेयं विहितं मन्यते भवान्”